International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(3): 11-12
© 2022 IJSR
www.anantaajournal.com
Received: 10-03-2022
Accepted: 16-04-2022

**अनुजकुमार**
शोध छात्र, संस्कृत, केन्द्रीय संस्कृत विश्वविद्यालय, दिल्ली, भारत

**Corresponding Author:**
**अनुजकुमार**
शोध छात्र, संस्कृत, केन्द्रीय संस्कृत विश्वविद्यालय, दिल्ली, भारत

# सीतारामीयं काव्ये एका समीक्षा

**अनुजकुमार**

**प्रस्तावना**

श्रीमता शंकरदेवावतरे महोदयेन कृतमिदं सीतारामीयं नामकं काव्यं त्र्यशीत्यधिकद्विशतं पद्ययुक्तं पूर्वार्धोत्तरार्धयोर्द्वयोः भागयोः विभक्तम्। सीतारामीयं कीदृशी काव्यविधा इति कवेः मनसि निश्चप्रचं नास्ति। नेदं महाकाव्यं सर्गबन्धादीनां तžक्षणनिर्दिष्टनियमानामपालनात्। रामायणस्य सम्पूर्णं कथावृत्तं सन्दर्भसाकांक्षतया एतदावेष्टते, तेन एकदेशीयचित्रणात्मकलक्षणलक्षितस्य खण्डकाव्यस्यपि कोट्यां पूर्णतया पातयितुमेतत् दुःशकम्। संवादकाव्ये सम्मुखस्थितयोः कल्पनाप्रयुक्तयोर्वा पात्रयोः परस्परमुक्तिप्रत्युक्तिपरिपाट्या तत्वनिर्णयवैचित्र्यं सम्पाद्यते, तेन तस्य प्रकारेण सह सीतारामीयस्य न कापि साम्य प्रपित्सा प्रतीयते। वस्तुतस्तु कपिना न कामपि काव्यविधां लक्ष्यीकृतसीतारामीयं निर्मितम्। तथापि एतत् काव्यरूपमेव इति कविना उक्तम्।

**रसाः –**

**'रस्यते आस्वाद्यते इति रसः'** [1]

रस आस्वादनयोग्यो भवति। नाट्यरसस्योत्पत्तिः तथा आस्वादनप्रकारः लौकिकरसास्वाद तथा तस्योत्पत्तिविशेषेण सह तुलनीयः। यथा विविधव्यंजन–औषधिः तथा द्रव्यसंयोगेन लौकिकी रसनिष्पत्तिः भवति तथैव नाना भावसंयोगेन स्थायीभावः रसरूपेण परिणतः जातः। सामान्यरूपेण अस्मिन् काव्ये सर्वेषां रसानां प्रयोगोऽस्ति, किन्तु मुख्यतयाऽत्र सीतारामयोः वियोगकारणेन करुणरसस्य प्रमुखताऽस्ति। यथा –

भूयस्तेऽरण्यवस्त्यै सुतनु सह मया दोहदं प्रादुरासीत्,
जातं ते किन्त्वजर्यं सह वनपशुभिः संगतं मां विनैव।
यत् ते मत्साहचर्याद् हृदि मधुरमभूद् मद्वियोगे कटु स्यात्,
दुःखं जन्तोः सुखं वा समुदयति यतः सा मनोवृत्तिरेव।। [2]

सीतारामीयं काव्यस्य एकोननवतितमे पद्ये श्रीरामस्यान्तरव्यथायाः वर्णनं कृतम्। सुतनु सीतायाः मया सह सीतायाः अजर्यं संगतं मां विनैव जातम्। रामस्य सहचर्यात् सीतायाः हृदये यद् मधुरम् आसीत् तद् रामवियोगे दुःखकरं स्यात्, अर्थात् सुखदुःखयोः कारणं मनोदशा एव विद्यते, मनोऽनुकूलवेदनीयं सुखम्, मनः प्रतिकुलवेदनीयं च दुःखम् इति। सीताविरहे एतादृशं श्रीरामस्य अन्तर्व्यथायाः चित्रणं कृतं श्रीमताशंकरदेवावतरे महोदयेन।

**ध्वनेः प्रयोगः –**

**'काव्यस्यात्मा ध्वनिः'** [3]

ध्वनेः प्रेरणा वैयाकरणानां स्फोटसिद्धान्तात् प्राप्यते। काव्ये सम्प्रदाये ध्वनिसिद्धान्तस्य प्रवर्तकाचार्यः राजानक–आनन्दवर्धनः अस्ति। किन्तु ध्वनिः सिद्धान्तस्य उद्भावना पूर्वमेव जातम्। तदेव ध्वन्यालोककारः आनन्दवर्धनाचार्यः निर्दिशति –

काव्यस्यात्मा ध्वनिरिति बुधैर्यः सम्मानात् पूर्वः।[4]

बुधैः व्याकरणैः।
प्रथमतो हि विद्वांसो वैयाकरणाः व्याकरणमूलत्वात् सर्वविद्यानां ते च श्रूयमाणेषु शब्देषु ध्वनिरिति व्यवहरन्ति।
वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य प्रधानत्वे सति ध्वनिरिति कथ्यते। यतोहि – तथाविधं काव्यं सर्वोत्कृष्टं मन्यते। अतः श्रीमता शंकरदेवमहोदयेन स्वकीयकाव्ये ध्वनिकाव्यस्य प्रयोगः उत्तमरीत्या कृतः। यथा –

न्यस्ता हस्तेन सार्धं पतिकरयुगले स्वस्य सर्वाधिकाराः,
ज्ञातिस्मृत्युत्थवाष्पैः श्वशुरकुलवनी सिंचनीया वधूभिः।
भर्तुः गोत्राभिधानं दधति युवतयः क्षिप्रभुदवाह्यमानाः,
नारीणां पुम्प्रधाने प्रचलति समये नास्ति धर्मो न जाति।। [5]

अर्थात् – पतिकरयुगले स्वकरेण सह आत्मनः सम्पूर्णा अधिकाराः समर्पिताः वधूभिः। विवाहविधौ प्राप्तव्याधिकारैः सह अन्येऽपि अप्राप्ता कामचाराद्यधिकारा दत्ताः इति। अत एव 'करयुगले' इत्यस्य साभिप्रायता वराय एकस्मिन् करे पाणिग्रहणसंस्कारसूचकं करं दीयते, द्वितीयकरे स्वस्य सर्वाधिकारा अपि वधूभिः सादरं समर्प्यन्ते इति। अतः अत्र ध्वनिर्मूला ध्वनिः प्रतीयते।

'पुम्प्रधाने प्रचलितसमये' इत्यत्र समाजपरिवर्तनं विना नारीसमुद्धारो न सम्भवः इति वस्तुप्रधान्येन ध्वन्यते। अतोऽत्र वस्तुध्वनिः प्रतीयते। काव्येऽस्मिन् अवतरेमहोदयेन उत्तमकाव्यस्य शोभनः प्रयोगः कृतः। इतोऽपि –

नार्येव क्षेत्रपुण्या क्षरति न पुरुषो यो बलीवर्ददृप्तः,
तस्मात् कौलीनदोषो रहयति पुरुषनापत्यङ्गनासु।
नारीं सौभाग्यहीनां निदरयति जनो नो पुमांसं बहुस्त्रिम्,
दम्भाजीर्णे समाजे पिबति परविषं स्त्री शिवस्येव मूर्तिः।। [6]

श्लोकेऽस्मिन् कौलीनदोषस्य फलं नारी भुङ्क्ते न पुरुषः इत्याह – अर्थात् कृषिसस्यसदृशः हितकारिणी स्त्री एव पतिता भवति। न पुरुषः क्षरति यः पुमान् बलीवर्द इव दृप्तः, इति बलीवर्द वृषसदृशोद्दण्डः भवति। तस्मात् कारणात् कौलीनदोषः कुलगतपुरुषान् मुञ्चति। निर्दोषान् इव जहाति। किन्तु नारीषु आपत्तिरूपेण आयाति। कुलकलंकविषये नार्य एव वाच्या, न तु पुरुषाः। अत्र सामान्यकथनेन सीतापरित्यागरूपः सम्बन्धविशेषो व्यज्यते इति अप्रस्तुतप्रशंसायाः भेदः। लोकः विधवां स्त्रीं निन्दति। बहुभार्यं पुरुषं न निदरयति। चारित्र्यहीनोऽपि पुमान् चारित्र्यदम्भं करोति। स्त्री दम्भपूर्णे पुरुषसमाजे पुरुषदोषं पुरुषकृतमपमानं वा अन्यत्र समुद्रमन्थनोत्पन्नं हलाहलं पाचयति धारयति वा। यथा समुद्रमन्थनकाले सुरासुरभयंकरं विषं नीलकण्ठो भगवानपिबत् तथा नार्यपि पतिकृतमपमानं मौनभावेन सहते इति तात्पर्यम्। यथा अजीर्णो जनं रुजति तथा दम्भस्याधिक्यं पुरुषसमाजं दूषयति।
श्लोकस्यास्यान्तिमे चरणे 'अजीर्णे' शब्दे यथा अजीर्णो जनं रुजति यथा दम्भस्याधिक्यं पुरुषसमाजं दूषयति। 'अजीर्ण' शब्दस्य लाक्षणिकत्वाल्लक्षणामूलोऽयं ध्वनिः। एवमेव अन्येष्वपि स्थानेषु काव्येऽस्मिन् ध्वनेः अनेकानि उदाहरणानि सन्ति।

## संदर्भ


1. आचार्याभिनयगुप्तः – रससम्प्रदायः
2. सीतारामीयं, पूर्वार्धः – 89
3. आचार्यानन्दवर्धनः – ध्वन्यालोकः
4. आचार्यानन्दवर्धनः – ध्वन्यालोकः
5. सीतारामीयम्, उत्तरार्धः – 177
6. सीतारामीयम् उत्तरार्धः – 180